नैयायिकास्तु व्यापारार्थकतानिराकरणेन यत्नार्थकतामाहुः यथा शब्दचिन्तामणौ

“आख्यातस्य यत्नवाचकत्वादचेतने रथो गच्छतीत्यादौ चाख्याते व्यापारलक्षणा तथाह्याख्यातस्य पचतीत्यादौ यत्नो वाच्यः पचति पाकं करोतीत्यादियत्नार्थककरोतिना सर्वाख्यातविवरणाद्वृद्धव्यवहारादिव बाधकं विना विवरणादपि व्युत्पत्तेः। द्वन्द्वादिसमासस्य विग्रहेण विवरणादपि विग्रहार्थे न शक्तिग्रहः अन्यलभ्यत्वात् किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थत्वं विनानुपपत्तेरित्याचार्य्याः। अत्र वदन्ति—आख्यातस्य करोतेश्च न यत्नार्थकत्वं रथो गच्छति जानाति यतते निद्रातीत्यत्र धात्वर्थानुकूलयत्नाभावेऽप्याख्यातपदप्रयोगात् गमनं करोतीति करोतिना तत्राख्यातविवरणाच्च अत्र व्यापारस्य करोत्यर्थत्वे चेतनेऽपि तथा। न च तत्राख्यातकरोत्योर्गौणत्वं मुख्ये बाधकाभावात्। अतएव प्रश्नोत्तरयोर्न यत्नार्थत्वं किन्तु क्रियावाचकत्वमेव कृञः, तेन किं करोतीति क्रियामात्रप्रश्ने पचति गच्छतीति क्रियाविशेषेणोत्तरमपि समञ्जसम्भवति”। ततः परोग्रन्थः कर्त्तृशब्दे १७१७ दर्शितो दृश्यः। तत्परस्तु—

“ननु प्रकृतेस्तदर्थत्वेऽपि प्रत्ययस्य न तदर्थत्वं दोषः एको द्वौ बहवः एषिषतीत्यत्रेव तत्सम्भवात्। यत्तु तत्र द्वितीयसंख्येच्छादिकल्पनावदिहापि द्वितीययत्नकल्पनमिति तन्न द्वितीययत्नेच्छाद्वाविच्छायत्नाऽभावात्। वस्तुतस्तु प्रत्यकसामर्थ्यावधृतौ सन्देहे उभयोपस्थितेरावश्यकत्वेन कस्याप्यनन्वयेऽप्यदोषात् पाकाय यतेत पाकं कुर्य्यादित्यत्र कृत्यर्थकाख्यातेऽपि तथैवान्वयादिति चेत् न एको द्वौ बहव इत्यत्र नामार्थस्य विभक्त्युपनीतसंख्यान्वयावगमायोग्यत्वात् लडादेर्यत्नसामर्थ्यानवधारणात् लिङः पचेतेत्यत्र कत्तौ सामर्थ्यावधारणाच्च। अथायत्नार्थकधातुपराख्यातस्य यत्नार्थत्वं तेन यतत इति नानन्वयः अचेतने चाख्यातप्रयोगो गौण एव। न च वृत्त्यन्तरेणापि प्रयोगसम्भवे शक्तिकल्पना युक्ता। यद्वाऽनुकूलयत्ने प्रवृत्तं पदं तदेकदेशेऽनुकूलमात्रे प्रवर्त्तते विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत्। अचेतने तु मध्यमोत्तमपुरुषौ न भवत एव उपपदयोर्युष्मदस्मदोस्तत्रानर्थत्वात्। भवतु वा गौण एव लोकस्यापर्यनुयोज्यत्वादिति चेत् न अचेतने आख्यातस्य मुख्यत्वे बाधकाभावेन गौणत्वाभावात् तस्मादाख्यातस्यानुकूलत्वेन व्यापारो वाच्यः” इति भाट्टाः। तेन चेतनाचेतनयोर्धात्वर्थानुकूलव्यापारस्य सत्त्वादाख्यातप्रयोगो मुख्य एव। पथि श्रमशयानेऽपि पचतीति स्यात् श्रमशान्तिद्वारा शयनस्य पाकानुकूलव्यापारत्वात् तत्र यत्नविशेषस्यैवानुकूलव्यापारविशेषस्य वाच्यत्वात् अन्यथा यत्नवाच्यत्वेऽपि तण्डुलानुकूलयत्नवति पचतीति स्यात् एवमचेतनेऽपि करोतिनाख्यातविवरणात् करोत्यर्थोऽपि व्यापारविशेषः। कथन्तर्हि चैत्रः पचतीत्यत्र पाकानुकूलताप्रतीतिः आक्षेपादिति चेन्न आख्यातार्थेन व्यापारेण संख्यया वा यत्नानपेक्षणात् तयोः प्रयत्नं विनापि सत्त्वात् नापि कर्त्त्रा, द्रव्यमात्रस्य कर्त्तृत्वात् यत्नवतश्च कर्त्तृत्वे आख्यातेन तदभिधाने यत्नस्याप्यभिधानात्। नापि धात्वर्थमात्रेण, तस्य यत्नं विनापि सत्त्वात् नापि यत्नो धात्वर्थः क्रियायास्तत्फलस्य वा धातुवाच्यत्वात् अन्यथा पाक इत्यत्रापि यत्नानुभवप्रसङ्गादिति चेत् न धात्वर्थविशेषेण पाकादिना यत्नाक्षेपात् तस्य यत्नं विनानुपपत्तेः। अथ पचतीत्यत्र पाकयत्नवानिति विवरणात् यत्नार्थतेति चेत् तर्हि कर्त्त्रर्थतापि स्यात् न हि पाकयत्न इत्येव विवरणं पचतीत्यस्य, तत्पार्य्यविवरणन्तत् तत्त्वाक्षेपेणापि निर्व्वहतीति चेत् तुल्यं यत्नेऽपि कथन्तर्हि रथो गच्छति, विद्यते व्योमेति भावनानुभव इति चेत् न कथञ्चित्, भावनाया धात्वर्थान्वयायोग्यत्वेन त्वयापि तत्र गौणत्वाभ्युपगमादिति। उच्यते। चैत्रः पचतीत्यत्र पाकानुकूलयत्नानुभवावाद्यत्न एवाख्यातार्थो लाघवात् नत्वनुकूलो व्यापारः यत्नत्वापेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात् नचाचेतन आख्यातार्थो मुख्यत्वार्थमनुगुणो व्यापार एवाख्यातवाच्यः मुख्यत्वसम्भवे त्यागायोगादिति वाच्यं शक्तिग्राहकेण लघुनि शक्तिपरिच्छेदात् अचेतने प्रयोगस्य वृत्त्यन्तरेणापि सम्भवात्। मुख्यत्वार्थं शक्तिकल्पने च वृत्त्यन्तरोच्छेदः। एतेन व्यापारवाचकस्याख्यातस्य यत्नसाध्यार्थकृपपच्यादिधातूपसन्धानेन व्यापारविशेषयत्नोपस्थापनमिति निरस्तं लाघवेन यत्नस्यैव शक्यत्वात् ननु यत्नो नाख्यातार्थः पाकत्वेन पाकस्य यत्नसाध्यत्वानुमित्या यत्नलाभादित्युक्तमिति चेन्न चैत्रो यत्नं कतीत्यतः पाकानुकूलवर्त्तमानयत्नवान् प्रतीयते। नच पाकस्य वर्त्तमानयत्नेन व्याप्तिरस्ति अतीतानागतयोर्व्यभिचारात्। न च धात्वर्थेनानुमिते यत्ने आख्यातेन वर्त्तमानतान्वयः सम्भवति यत्नस्यापदार्थत्वात् स्वार्थव्यापारस्य वर्त्तमानत्वबोधनेनाख्यातस्य पर्य्यवसि-